दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-307

1 31.08.2024 शनिवासरः वि.सं. २०८० भाद्रपदकृष्णत्रयोदशी भाद्रपद 16 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## भारतस्य फिनटेक इति सम्पूर्ण विश्वे जनजीवनस्य सुगमतायै कार्य कोरति-प्रधानमन्त्री नरेन्द्र मोदी



हिमसंस्कृतवार्ताः। प्रधानमन्त्री नरेन्द्र मोदी महाराष्ट्रस्य मुम्बई-नगर्यां ग्लोबल-फिनटेक-फेस्ट-महोत्सवे चतुर्विंशत्यधिक-द्विसहस्रतमे अस्मिन् वैश्विक समारोहे भारतदेशस्य फिनटेक-प्रगतिविषयं प्रति ध्यानाकर्षयित्वा अवदत् भारतस्य फिनटेक इति सम्पूर्ण विश्वे जनजीवनस्य सुगमतायै कार्य कोरति। सः उक्तवान् भारतद्वारा फिनटेक इति इदं स्वीकरणं गति-माप- दृष्ट्योः विश्वे अन्यतमम् अस्ति। एतेन कारणेन समग्रस्य विश्वस्य तात्कालिकं प्राविधिक-क्रयं-विक्रयं इति भारते जातम् अस्ति। भारतदेशे 'फिनटेक' इत्यनेन माध्यमेन यत् परिवर्तनम् अभवत् एतत् केवलं प्रौद्योगिकपर्यन्तं सीमितं नास्ति। इत्यस्य सामाजिक-प्रभावं अति व्यापकम् अस्ति। फिनटेक-द्वारा ग्राम-नगरयोः मध्ये व्यापक-दूरीं दूरीकर्तुं सेतोः निर्माणस्य कार्यम् कृतम्। श्री मोदी अवदत् फिनटेक इत्यस्य वित्तीयसेवानां लोकतन्त्रीकरणे महती भूमिका अस्ति।तदन्तरं प्रधामन्त्री राज्यस्य पालघरजनपदे वाधवन-जलपोतस्थानकस्यापि आधारशिलां स्थापितवान्। असौ विभिन्नासां मत्स्यपालन-परियोजनानामपि उद्घाटनं विहितवान् अथ च मत्स्यपालकेभ्यः धीवरेभ्यः नियन्त्रणोपकराणि कृषक ऋण-प्रपत्रं च वितरितवान्। अत्रावसरे प्रधानमन्त्री प्रावोचत् यत् विगतेषु दशवर्षेषु भारतस्य तटेषु विकासेनापि जलपोत-स्थानकानां आधुनिकीकरणं कृतम्, अपि च जलमार्गाः विकसिताः। अस्मिन् दिशि लक्षात्मक-कोटिरूप्काणां निवेशः अपि जातः। येन युवभ्यः लाभः नवीनावसराः मेलिष्यन्ति।

## ब्रुनेई-सिङ्गापुरयोः त्रिदिवसीय यात्रायै गमिष्यति प्रधानमन्त्री

हिमसंस्कृतवार्ताः प्रवीण कुमारः

प्रधानमन्त्री नरेन्द्रमोदी मंगलवासरात् ब्रुनेई-सिङ्गापुरयोः त्रिदिवसीययात्रायै गमिष्यति। नवीदिल्लीनगरे मीडियासमीपं वदन् विदेशप्रवक्ता रणधीरजयसवालः अवदत् यत् ब्रुनेईदेशस्य सुल्तानस्य हाजीहसनलबोल्कियाहस्य आमन्त्रणेन मोदीमहोदयः ०३ सितम्बर दिनाङ्के ब्रुनेईदारुसलामस्य भ्रमणं करिष्यति। जयसवालमहोदयः अवदत् यत् एतत् कस्यापि भारतीयप्रधानमन्त्रिणः प्रथमा द्विपक्षीययात्रा भविष्यति। भारतस्य ब्रुनेई-नगरस्य च कूटनीतिकसम्बन्धस्य ४० वार्षिकी अवसरे एषा यात्रा भवति इति सः अवदत्।

## भारतस्य अवनि-लेखरा महिलानां दशमीटरात्मक्यां एयर राइफइल प्रतिस्पर्धायां स्वर्णपदकं विजितवती



पेरिसनगरे प्रचल्यामानासु पैरालम्पिक क्रीडासु भारतस्य अवनि-लेखरा इत्येषा महिलानां दशमीटरात्मक्यां एयर राइफइल प्रतिस्पर्धायां स्वर्णपदकं विजितवती, तत्रैव मोनाअग्रवालः अष्टाविंशत्यधिकद्विशतं दशमलव सप्त इति अर्कैः सह कांस्यपदकं समर्जितवती। अपरत्र, लक्ष्यभेकदः क्रीडकः मनीषनरवालः पुरुषाणां दशमीटरात्मके एयरपिस्टल इत्याख्यस्य द्वन्द्वस्य अन्त्यचक्रे समाविष्टः।

## झारखण्डमुक्तिमोर्चादलस्य विधायकः रामदास- सोरेनः मन्त्रिपदभारं स्वीकृतवान्



झारखण्डराज्ये, हेमन्तसोरेनप्रशासने झारखण्डमुक्तिमोर्चादलस्य विधायकः रामदास- सोरेनः मन्त्रिपदभारं स्वीकृतवान्। घाटशिलातः विधायकः एषः राज्यमन्त्रिमण्डले पूर्वमुख्यमन्त्रिणः चम्पईसोरेनस्य स्थाने आगतः। राजस्य राजभवने संतोषकुमार-गंगवारः रामदाससोरेनाय मन्त्रिपदाय शपथवचनं प्रदत्तवान्। अत्रावधौ मुख्यमन्त्रिणः हेमन्तसोरेनं समेत्य अन्ये च जनाः उपस्थिताः आसन्।

## पाकिस्तानदेशेन सह निर्बाधगतवार्तायाः युगः अवसीयते-विदेशमन्त्री डॉ एस्. जयशङ्करः



विदेशमन्त्री डॉ एस्. जयशङ्करः प्रोक्तवान् यत् पाकिस्तानदेशेन सह निर्बाधगतवार्तायाः युगः अवसीयते। तेन सबलं प्रतिपादितं यत् कार्याचरणस्य परिणामाः भवन्ति। डॉ. जयशङ्करः वार्ता नवदिल्ल्यां एकस्य पुस्तकस्य विमोचन समारोहे उक्तवान्। असौ भणितवान् यत् भारतं केषुचिदपि प्रसङ्गेषु निष्क्रियं नास्ति। बाङ्गलादेशस्य प्रसङ्गं अवलम्य विदेशमन्त्रिणा निगदितं यत् पारस्परिक कल्याणाय भारतेन ध्यानं प्रदीयते। मालदीवदेशेन सह भारतस्य सम्बन्धेषु डॉ. जयशङ्करः प्रोदीरितवान् यत् मालदीवदेशं प्रति भारतस्य दृष्टिकोणे वैषम्यतास्ति समावेशि-देशैः प्रत्येकं देशस्य स्थितिः वैषम्ययुता एव भविष्यति।

## अद्य जनपद- न्यायपालिकायाः राष्ट्रिय सम्मेलनस्य उद्घाटनं करिष्यति प्रधानमन्त्री




हिमसंस्कृतवार्ताः 31 अगस्त। प्रधानमन्त्री नरेन्द्रमोदी अद्यप्रातः नवदिल्ल्याः भारतमण्डपमस्थाने जनपद- न्यायपालिकायाः राष्ट्रिय सम्मेलनस्य उद्घाटनं करिष्यति। अत्रावसरे प्रधानमन्त्री सर्वोच्चन्यायालयस्य स्थापनायाः पञ्चसप्ततितमवर्षस्य सम्पूर्त्यवसरे प्रैष्यपत्रस्य मुद्रायाः च अनावरणं करिष्यति। अवधेयं वर्तते यत् सर्वोच्चन्यायालयद्वारा आयोजिते एतस्मिन् द्विदिवासत्मके सम्मेलने आधारभूतसरञ्चनां समावेशि-न्यायालय-कक्षं न्यायिक-सुरक्षा प्रतिवेदनप्रबन्धनं प्रशिक्षणं च समाश्रित्य जनपद-न्यायपालिकायाः विषयेषु आश्रितानि पञ्चसत्राणि प्रमुखतया सुनिश्तिानि। औद्घाटनिकसत्रे मुख्न्यायाधीशः केन्द्रीय विधिन्यायमन्त्री च उपस्थितौ भविष्यतः।

## त्रिभ्यः वन्देभारत-रेलयानेभ्यः हरितध्वजं प्रदर्शयिष्यति प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्र मोदी दृश्य-श्रव्य-परान्तर्जालीय-माध्यमेन अद्य अपराह्ने त्रिभ्यः वन्देभारत-रेलयानेभ्यः हरितध्वजं प्रदर्शयिष्यति। मेकइनइण्डिया-आत्मनिर्भर-भारत- इत्युपक्रमयोः अन्तर्गतं निर्मितानि एतानि त्रीणि वन्देभारतरेलयानानि त्रिषु मार्गेषु मेरठ-लखनऊ- मदुरै-बेंगलुरु-चेन्नै-नागरकोइल इत्येतेषु सम्पर्कसौविध्यं परिमार्जितं करिष्यन्ति। एतानि नवीनानि रेलयानानि त्रिषु राज्येषु यथा उत्तरप्रदेश-तमिलनाडु-कर्णाटकेषु जनेभ्यः यात्रायाः विश्वस्तरीयसाधनं गतिं सौख्यं च प्रदास्यन्ति। अपि च नियमितयात्रिणां व्यापारिणां छात्रसमुदायानां अत्यावश्यकतां सम्पूरयितुं रेलसेवायाः एकस्य अभिनवस्य मानकस्यापि शुभारम्भं करिष्यति।

## सुभाषितम्

**शनैः शनैरुपरमेद्**
**बुद्ध्या धृतिगृहीतया।**
**आत्मसंस्थं मनः कृत्वा**
**न किंचिदपि चिन्तयेत्॥**

(श्रीमद्भगवद्गीता- ६.२५)

**भावार्थः-** मनुष्य क्रम से अभ्यास करता हुआ धैर्यपूर्वक बुद्धि द्वारा मन को परमात्मा में स्थित करके परमात्मा के अतिरिक्त और कुछ भी चिन्तन न करे।

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## सीमवर्तिषु क्षेत्रेषु शान्तिं स्थापयितुं भारत-चीन-देशौ निर्णयम् अकुरुताम्-गौरङ्गलालदासः

सीमवर्तिषु क्षेत्रेषु शान्तिं स्थापयितुं भारत-चीन-देशौ निर्णयम् अकुरुतां। उभौ देशौ पुनः उक्तवन्तौ यत् पुनःस्थापनं, वास्तविकनियन्त्रणरेखायाः सम्मानं द्वैपाक्षिकसम्बन्धेषु सामान्यस्थितेः पुनःस्थापनस्य आवश्यकम् आधारः अस्ति इति। भारत-चीन-सीम-विषयेषु परामर्शाय समन्वयाय च कार्य-तन्त्रस्य एक त्रिंशत्तमं सम्मेलनं परह्यः बिजिंग-नगरे समायोजितम्। विदेशमन्त्रालयस्य संयुक्तसचिवः पूर्व-एशियायाः गौरङ्गलालदासः भारतीयप्रतिनिधि-मण्डलस्य नेतृत्वं कृतवान्। विदेशमन्त्रालयानुसारि उभौ पक्षौ वास्तविक नियंत्रण रेखायां स्थितिं विषये मुक्तं, रचनात्मकं, दूरदर्शिनं च विचाराणाम् आदानप्रदानम् कृतवन्तौ, येन भिन्नाभिप्रायान् न्यूनीकर्तुं, प्रलंबितानां विषयाणां शीघ्रं समाधानम् अन्वेष्टुं च शक्यते।

## ओडिशा-तटीय-आन्ध्रप्रदेश - छत्तीसगढ- विदर्भ-तेलंगाना- क्षेत्रेषु अतीव-प्रचण्डवृष्टिः

भारतर्तुविज्ञान विभागेन आगामीषु त्रिषु दिवसेषु ओडिशा-तटीय-आन्ध्रप्रदेश - छत्तीसगढ- विदर्भ-तेलंगाना-क्षेत्रेषु अतीव-प्रचण्डवृष्टेः पूर्वानुमानं कृतम्। विभागेन उक्तम् यत् गुजरातस्य विदर्भस्य च केषुचित् स्थानेषु एतादृशी परिस्थितिः स्थास्यति तथा च कच्छ त्रे निर्मितः वायुप्रबलक्षेत्रः चक्रवाते परिवर्तितः । अद्य कच्छ क्षेत्रे प्रचण्डवृष्ट्याः सम्भावना अस्ति।

# हिमाचले व्यावसायिकक्रियाकलापं कुर्वन्तः उपभोक्तारः न्यूनदरेण विद्युत् न प्राप्स्यन्ति



**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचले व्यावसायिकक्रियाकलापं कुर्वन्तः उपभोक्तारः न्यूनदरेण विद्युत् न प्राप्स्यन्ति। राज्यसर्वकारेण प्रति यूनिट एकरुप्यकम् इत्यस्य अनुदानं न दातव्यम् इति निर्णयः कृतः अस्ति। गृही-औद्योगिक-कृषिक्षेत्रेषु उपभोक्तृभ्यः तावत्पर्यन्तं आश्रयं भविष्यति। उपभोक्तॄणां त्रयः अपि वर्गाः विद्युत्दरेषु अनुदानं प्राप्नुयुः। पञ्चकिलोवाट-अधिक-क्षमतायुक्तानि मीटरस्थापनं कुर्वद्भ्यः वाणिज्यिक-उपभोक्तृभ्यः प्रतियूनिटं ६.५२ रुप्यकाणां दरेण विद्युत् प्रदास्यते। अधिकांशः आपणिकः तस्य व्याप्तेः अधीनं न आगमिष्यति। सर्वकारस्य निर्णयेण होटलानि, वस्तुविपणिभिः च सहितं बृहत्व्यापारिणः प्रभाविताः भविष्यन्ति ऊर्जासचिवेन राज्यविद्युत् नियामक-आयोगाय पत्रं प्रसार्य अनुदानं हत्वा नूतनानि विद्युत्दराणि निर्गन्तुं अनुरोधः कृतः।

### कः केन दरेण विद्युत् प्राप्स्यति?

1. अधुना सिञ्चन-पेयजलयोजनासु प्रति यूनिट ५.१२ तः ५.६६ रुप्यकाणां दरेन विद्युत् प्राप्स्यति।
2. वीथिप्रकाशानां दरेण प्रति यूनिट ६.३७ रुप्यकाणि भविष्यन्ति। अस्थायी आपूर्तिः प्रति यूनिट् ८.४२ रुप्यकाणि भविष्यति।
3. विद्युत्वाहनस्य (ईवी) चार्जिंगस्थानकस्य कृते ६.७९ रुप्यकाणि, रेलवे कृते ६.१६ रुप्यकाणि, अगृही-अव्यावसायिकस्य कृते ६.१६ तः ६.४२ रुप्यकाणि प्रति यूनिट् च भविष्यति।
4. प्रचुरापूर्तिः (बल्क सप्लाई) इत्यस्य दरः प्रति यूनिट ५.५६ तः ६.२६ रुप्यकपर्यन्तं भविष्यति। सर्वकारः सर्वेभ्यः उपभोक्तृवर्गेभ्यः प्रति यूनिट एकरूप्यकाणाम् अनुदानं ददाति स्म।

# नगरनिगमकार्यालये कस्यापि मन्त्रिणः शिविरकार्यालयस्य निर्माणं न भविष्यति - मुख्यमंत्री सुखविन्दरसिंहसुक्खुः



हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसुक्खुः उक्तवान् यत् कस्मिन् अपि नगरपरिषदि वा नगरनिगमकार्यालये कस्यापि मन्त्रिणः शिविरकार्यालयः न भविष्यति। एवं प्रकारेण कस्यापि विश्रामगृहस्य उपयोगः कर्तुं न शक्यते । यस्य कार्यस्य कृते ते परिकल्पिताः सन्ति तत् केवलं कृतं भविष्यति। मुख्यमंत्रिणा सुखविन्दरसिंहसुक्खुना उक्तं यत् स्मार्ट सिटी परियोजना राज्यसर्वकारस्य परियोजना न अपितु केन्द्रसर्वकारस्य परियोजना अस्ति तथा च शिमला धर्मशाला च अत्र स्मार्ट सिटी कृताः एव। अधुना कोऽपि प्रस्तावः तदा एव आगमिष्यति यदा केन्द्रसर्वकारः पृच्छति। मण्डी-विधायकस्य अनिलशर्मा-महोदयस्य मण्डी-नगरं स्मार्ट-नगरं करणीयम् इति प्रश्ने मुख्यमंत्री-महोदयेन एतत् उक्तम्। हस्तक्षेपं कृत्वा सः अवदत् यत् कुत्रापि कस्यचित् शिविरगृहस्य निर्माणस्य अनुमतिः नास्ति, यतः पूर्वं अनिलशर्मा इत्यनेन पृष्टं यत् निर्वाचनसमये विक्रमादित्यसिंहेन मण्डीनगरे शिबिरगृहं निर्मातुं घोषितं, मण्डीनगरं च स्मार्टसिटीमध्ये समाविष्टं भविष्यति। तत् आनेतुं प्रतिज्ञां कृतवान् आसीत्, परन्तु एतानि केवलं वक्तव्यानि आसन्, निर्वाचनं च वक्तव्यैः न विजयते। अत्र नगरविकासमन्त्री विक्रमादित्यः अद्य सदने उपस्थितः नासीत्, अतः पंचायतीराजमन्त्री अनिरुद्धसिंहः तस्यस्थाने प्रश्नस्य उत्तरं ददाति स्म । अनिरुद्धसिंहः अवदत् यत् स्मार्टसिटी केन्द्रसर्वकारेण निर्मितं भवति इति कारणेन मण्डीनगरं स्मार्टसिटी कर्तुम् इति प्रस्तावः नास्ति। सः अवदत् यत् विक्रमादित्यसिंहस्य परिवारेण मण्डी इत्यस्य बहु सेवा कृता किन्तु कङ्गना तत्रत्यानां जनानां आधारपत्रं याचते। सम्प्रति यदा केन्द्रसर्वकारः स्मार्टसिटीपरियोजनां अग्रे गृह्णीयात् तदा मण्ड्याः अपि चिन्तनं भविष्यति।

# विधानसभाध्यक्षस्य वक्तव्ये विपक्षस्य सदस्यानां सदने कोलाहलः



**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेशस्य विधानसभायाः मानसूनसत्रस्य चतुर्थे दिने शुक्रवासरे विधानसभाध्यक्षस्य टिप्पण्याः विषये सदने कोलाहलः अभवत्। भाजपाविधायकः इन्द्रदत्तलखनपालः निर्वाचनकाले सभापतिना आपत्तिजनकाः टिप्पण्यः कृताः इति उक्तवान्। सभापतिः अवदत् यत् सदने एतादृशं किमपि न घटितम्। सदने एतादृशाः विषयाः उत्थापयितुं न शक्यन्ते। अस्य विषये भाजपा सदस्याः घोषोद्घोषान् उद्धृत्य सभापतेः समीपं प्राप्तवन्तः। सभापतिना भाजपाविधायकान् कार्यविधिं कर्तुं सचेतितम्। तदनन्तरं कोलाहलं वर्धमानं दृष्ट्वा विधानसभाध्यक्षः भाजपाविधायकानां घोषप्रचारस्य मध्यं सदनस्य कार्यवविधिम् अपराह्ने २:०० वादनपर्यन्तं स्थगितवान्। अपराह्ने २:०० वादनानन्तरं पुनः सदनस्य कार्यविधिः आरब्धा। ततः पूर्वं सदनस्य विपक्षनेता जयराम ठाकुरः थुनागे वानिकी-महाविद्यालयस्य निर्माणं न करणीयम् इति विषयम् उत्थापितवान्। सः अवदत् यत् वर्तमानसर्वकारः इच्छया महाविद्यालयस्य निर्माणं न करोति। कुत्रचित् स्थानान्तरयितुं वा पिधातुं वा सज्जताः सन्ति। तस्य प्रतिक्रियारूपेण राजस्वमन्त्री जगतसिंहनेगी इत्यनेन उक्तं यत् परामर्शकः चयनितस्थाने महाविद्यालयस्य निर्माणार्थं अनुमोदनं न दत्तवान्। जगतसिंहनेगी उक्तवान् यत् पूर्वमुख्यमन्त्री स्वस्य विधानसभाक्षेत्रे अनेके उद्यविमानस्थलानि, विश्रामगृहाणि च निर्मितवान्। एतेषु स्थानेषु महाविद्यालयाः स्थानान्तरयितुं शक्यन्ते वा इति सर्वकारः विचारयति। अस्मिन् विषये भाजपाविधायकाः विरोधरूपेण सदनात् बहिः गतवन्तः।

# जगतप्रकाशनड्डा इत्यनेन सह मेलितुं आगतायै कङ्गनायै राष्ट्रीयाध्यक्षस्य परामर्शः



**हिमसंस्कृतवार्ताः - नवदेहली।** बॉलीवुड-अभिनेत्री भाजपासांसद च कङ्गनारणौतायाः कृषक-आन्दोलनस्य, ततः जाति-जनगणनायाः च विषये स्वस्य वक्तव्यस्य विषये विवादः अस्ति। इदानीं गुरुवासरे कङ्गना नवदेहल्यां भाजपादलस्य राष्ट्रीयाध्यक्षेण जगतप्रकाशनड्डा इत्यनेन सह मिलितवती। कथ्यते यत् जेपी नड्डा कङ्गनायै अवदत् यत् यदि भवती वार्तालापं कर्तुम् इच्छति तर्हि भवत्यै संसदीयक्षेत्रस्य विषये वक्तव्यम्। तत्रत्यानां समस्यानां विषये चर्चां कुर्वन्तु, परन्तु ये विषयाः नीतिगतविषयाः सन्ति, ये दलस्य शीर्षनेतृत्वेन निर्णयाः भवन्ति वा ये विषयाः कथञ्चित् सर्वकारेण सह सम्बद्धाः सन्ति, तेषां विषये वक्तव्यं न ददातु। भवती निश्चितरूपेण सांसद अस्ति, परन्तु नीतिगतविषयेषु भवती अधिकृतः नास्ति, न च तेषु वक्तुं शक्नोति। स्पष्टतया कङ्गनायाः वक्तव्यस्य विषये भाजपा स्वस्य लाभहान्योः तौलनं कुर्वन् अस्ति। पूर्वं काङ्ग्रेसस्य प्रवक्त्री सुप्रियाश्रीनेट् कङ्गनायाः एकं चलचित्रं प्रसारितवती यस्मिन् कङ्गना वदति यत् देशे जातिगणना सर्वथा न भवेत् इति। काङ्ग्रेसेन कङ्गनायाः एतत् वचनं भाजपायाः चिन्तनम् इति उक्तं, भाजपा जातिगणनायाः विरुद्धा इति च उक्तवती।

# फ्रान्सदेशस्य राष्ट्रियकृषि-खाद्यपर्यावरणसंशोधनसंस्थायाः वैज्ञानिकानां प्रतिनिधिमण्डलं मुख्यमन्त्रिणा सुक्खुना सह अमिलत्



फ्रान्सदेशस्य राष्ट्रियकृषिखाद्यपर्यावरण-संशोधनसंस्थायाः (INRAE) चतुर्णां वैज्ञानिकानां प्रतिनिधिमण्डलेन शुक्रवासरे मुख्यमन्त्री ठाकुर सुखविन्दरसिंह सुखू इत्यनेन सह मेलनं कृतम्। LISIS इत्यस्य उपनिदेशिका प्रो.एलिसन मैरी लोकोन्टो इत्यस्य नेतृत्वे अस्मिन् दले शोधकर्तारः प्रो. प्राकृतिककृषिक्षेत्रे कृता प्रगतिविषये सूचनां प्राप्तुं सः हिमाचलप्रदेशस्य भ्रमणार्थम् आगतः अस्ति। समागमे मुख्यमन्त्री प्राकृतिककृषेः क्षेत्रे हिमाचलप्रदेशः अग्रणीः राज्यः इति उक्तवान् । प्राकृतिककृषिद्वारा उत्पादितानां उत्पादानाम् न्यूनतमसमर्थनमूल्यं प्रदातुं देशस्य प्रथमं राज्यं हिमाचलम् अस्ति । राज्ये गोधूमस्य क्रयणं प्रतिकिलो ४० रुप्यकेण, कुक्कुटस्य च क्रयणं ३० रुप्यकाणां दरेन क्रियते। एतदतिरिक्तं गोदुग्धं प्रतिलीटरं ४५ रुप्यकेण, महिषदुग्धं च ५५ रुप्यकेण प्रतिलीटर मूल्येन क्रयणं क्रियते। प्राकृतिककृषौ उत्पादप्रमाणीकरणस्य महत्त्वं सः अवदत्। सः अवदत् यत् राज्ये सितारा प्रमाणीकरणव्यवस्था आरब्धा अस्ति, या कृषकाणां कृते उचितमूल्यानि प्रदातुं प्रवर्तते। मुख्यमन्त्री उक्तवान् यत् राज्ये हिम-उन्नाटी योजना क्लस्टर-आधारित-पद्धत्या, रसायन-मुक्त-उत्पादनं प्रमाणीकरणं च उद्दिश्य कार्यान्वितं भवति।

# पूर्णिमा अमावस्ययोः शास्त्रचर्चा भविष्यति

## कुलपतिना प्रो. लक्ष्मीनिवासपाण्डेयवर्येण संस्कृतविश्वविद्यालये आहूतं आईक्यूएसी (आन्तरिक- गुणवत्ता- आश्वासनप्रकोष्ठस्य) उपावेशनम् सम्पन्नम्



**हिमसंस्कृतवार्ताः- दरभङ्गा।** संस्कृतविश्वविद्यालयस्य कुलपतिना प्रो. लक्ष्मीनिवासपाण्डेयः अध्यक्षेण गुरुवासरे तस्य कार्यालये आहूतम् आन्तरिकगुणवत्ता-आश्वासनप्रकोष्ठस्य (आईक्यूएसी) बैठकमासीत्। अस्मिन्नेव उपावेशने असंख्येषु महत्त्वपूर्णेषु निर्णयेषु चर्चा जाता। निश्चितमभवत् यत् इदानीं पूर्णिमा अमावास्ययोः नियमितरूपेण पाक्षिकशास्त्रचर्चा भविष्यति। अद्यावधि एषा चर्चा स्थानीय रमेश्वरलता संस्कृतमहाविद्यालये शिक्षाशास्त्र- स्नातकोत्तर- विभागयोः छात्राणां साहचर्ये भविष्यति, यत्र शिक्षकैः पर्यवेक्षणं कर्तव्यमस्ति। अन्यस्यापि निर्णयस्य क्रमे निश्चितमभवत् यत् विश्वविद्यालयस्य गौरवमयस्य इतिहासस्य सशक्ततायै गठिताः कला साहित्यिकमञ्चः समितयः वा पुनर्गठनीयाः भविष्यन्ति। छात्राणाम् कृते अनिवार्यरूपेण स्थानं दातव्यमिति। एतद्विषये पीआरओ निशिकान्तेन उक्तं यत् विश्वविद्यालये किञ्चित्कालपूर्वं कुलपतिना प्रो. पाण्डेयः विशेषनिर्देशेण शास्त्रसञ्जीवनीमञ्चः, क्रीडास्वास्थ्यवमञ्चः, संस्कृतप्रचारमञ्चः, कलारञ्जनीमञ्चः, पर्यावरणमञ्चः, युवाचेतनामञ्चः, महिलाचेतनाप्रकोष्ठश्च गठनं कृतम्। एतेषां मंचानां समितीनां च पुनर्गठनं भविष्यति। इदं निर्णयमपि अभवत् यत् एतेषां मंचानां नियमितं उपावेशनं भविष्यति, नवीनानां जनानां च सम्मिलनस्य प्रयासो भविष्यति। इदानीं निर्णयमपि कृतं यत् कला रञ्जनीमञ्चस्य सौजन्येन शिक्षाशास्त्रस्य छात्राणां राष्ट्रगानं, कुलगीतं वैदिकमंगलाचरणं च साधयितव्यमिति। शास्त्रसमवर्धिनीमञ्चं क्रियाशीलं कर्तुं छात्राणां शिक्षकाणां च भागीदारीं वर्धयितुं बलं दत्तम्। अस्मिन् क्रमे अपि निर्णयः अभवत् यत् कक्षासु छात्राणां संख्या कथं वर्धयितव्या इति। एनएसएससंस्थायाः इकाई इत्यस्याः विशेषम् अभियानं सञ्चालयिष्यति। निर्णयमभवत् यत् आईक्यूएआराय डीन डॉ. शिवलोचन झावर्येण सर्वेषां विभागाध्यक्षानां उपावेशनं शीघ्रम् आहूयते। सर्वेषु संस्कृतमहाविद्यालयेषु अनिवार्यरूपेण संस्कृतसंभाषणम् आयोजयितव्यमिति डॉ. दिनेश झा सीसीडीसीणां उपावेशने सूचना प्रदत्तवान्। पर्यवेक्षणे क्रीडास्वास्थ्यवमञ्चस्य कैलेंडरं संकल्पयित्वा महाविद्यालयानां संयोगं कर्तुं निर्णयं कृतम्। एवमेव पर्यावरणमञ्चस्य माध्यमेन परिसरं वृक्षारोपणं भविष्यति। उपावेशनेऽस्मिन् मुख्यतः कुलपतिः प्रो. पाण्डेयः, डॉ. पुरेन्द्रबारीकः, डॉ. शिवलोचन झाः, डॉ. दिनेश झाः, डॉ घनश्याममिश्रः, डॉ. साधनाशर्मा, डॉ. शम्भूशरणतिवारी, डॉ. यदुवीरस्वरूपशास्त्री, डॉ. रामसेवकझाः, डॉ. नरोत्तममिश्रः, डॉ. अवधेशकुमार श्रोतीयः, डॉ. ध्रुवमिश्रः, डॉ. सुधीरकुमार झाः, डॉ. धीरजकुमारपाण्डेयः, डॉ. एल. सवितार्या, पवन सहनी च उपस्थिताः आसन्।

# भारतं विश्वमार्गदर्शकम्



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

भारतम् इतीदं तत्त्वपूर्णं नाम वर्तते। 'भा' इत्युक्ते प्रकाशः अथवा ज्ञानम्, 'रत' इत्युक्ते यत्र अस्मिन् ज्ञाने रतिः स्यात् तत् अर्थात् 'भारतम्' इति। तादृशः ज्ञानोपेतः देशः भारतम् इति। यत्र ज्ञानम् आद्रियते, त्यागः च प्रशस्यते तादृशं पुण्यक्षेत्रं हि भारतम् आख्यायते। पुण्यभूमि-भारतवर्षं धर्मशक्तिरूपसम्पद् अस्ति। धर्मशक्तिर्हि दुःखदैन्यादिछायातो मनुष्यान् रक्षति। असौ भारतं हि पृथ्व्यां स्वर्गः, सुख-समृद्धि-सौन्दर्याणां धाम वर्तते। यः अस्मिन् देशे उत्पन्नः, यः अस्य अन्नजलादिभिः पालितः पोषितश्च, यः अस्याः पुण्यभूमेः भक्तः स्यात्, यश्च एनं देशं हि स्वगृहं मन्यते, स वास्तविको भारतीयः कथ्यते। यः कोऽपि उत्तरमार्गीयः स्यात्, अथवा दक्षिणमार्गीयः, आर्यः स्याद् अथवा द्रविडः, ब्राह्मणः स्याद् अथवा हरिजनः, सः सर्वोऽपि भारतीयो हि वर्तते। अत्र यः कोऽपि वर्णीयः अथवा धर्मसम्प्रदायानुयायी भवेन्नाम, यदि स भारते भारतार्थं निवसेत्, जीवेत्, स्वश्रद्धाभक्तियुक्तं जीवनं भारतसेवायाम् उन्नत्याञ्च योजयेत् तर्हि सः प्रकृतार्थतो भारतपुत्रो हि आख्यायते। चिच्छक्तेः अस्याम् आध्यात्मिकैकतायाम् अस्मद्देशस्य गौरवं गूहितमस्ति। अस्याः आधारभूतैकतायाः अभावाद्धि अस्मद्देशो वारं वारं दासत्वबन्धनेन बद्धो जातः। भारतं देवमनुष्याणाम् आशीर्वादात्मकं स्थानमस्ति। आध्यात्मिकज्ञानस्य प्रभुतसम्पत्तिः अत्रैव विद्यते। वेदः, उपनिषत्, गीता, रामायणं, भागवतं, महाभारतं, भारतशक्तिः, योगशक्तिः, साधुवाणी, सत्यानुभूतिः, अन्तर्ज्ञाननिधिः इत्यादयः सर्वेऽपि मानवकल्याणार्थम् अत्रैव उपलभ्यन्ते। वैज्ञानिकसंस्कृतौ अपि भारतं न अकिञ्चनं स्यात् कदाचिदपि। एवमेव सङ्गीतं, चित्रकला, मूर्तिनिर्माणकला, वास्तुशास्त्रम्, अस्त्रविद्या, फलितज्योतिषम् इत्यादिषु न कोऽपि इतरदेशः अद्यावधि भारततः अग्रे अवलोक्यते। योगशास्त्रे तु भारतं सदा हि जगद्गुरुत्वेन हि तिष्ठति इति, शुभम्।

# '' प्रारब्धः तथा च सङ्गतिः''



एकस्य भ्रमरस्य मैत्री गोमयकीटकेन सह अभवत् । दिने दिने तयोः मैत्री दृढा अभवत् । एकस्मिन् दिने कीटकः भ्रमरम् अवदत् – "भो! त्वं मम उत्तमं मित्रं तर्हि श्वः त्वं मम गृहे भोजनार्थम् आगच्छतु" इति ।
भ्रमरः अपरस्मिन् दिने एव कीटकस्य गृहं भोजनाय अगच्छत् । किन्तु तत्र गत्वा स चिन्तितवान् यन्मया अयुक्ता सङ्गतिः प्राप्ता खलु ? तेन कारणेन गोमयभक्षणम् अहं कृतवान् । भ्रमरेण कीटकः स्वगृहम् आमन्त्रितः । श्वः एव त्वं मम गृहे आगच्छतु इति । अपरस्मिन् दिने प्रातःकाले एव कीटकोऽपि भ्रमरस्य गृहम् अगच्छत् । कीटकस्य आगमनानन्तरं भ्रमरः तं पाटलपुष्पे उपावेशयत् । पाटलपुष्पे कीटकेन परागस्य पानं कृतम् । "अहोभाग्यं मम" इति कीटकेन चिन्तितम् । तस्मिन्नेव क्षणे प्रतिवेशिनः मन्दिरस्य अर्चकः तत्र आगतवान् । तेन पाटलपुष्पं त्रोटयित्वा , नीत्वा च श्रीकृष्णाय समर्पितम् । कीटकः भगवतः श्रीकृष्णस्य दर्शनम् अलभत । सः आत्मानं धन्यम् अमन्यत यतोहि श्रीकृष्णस्य चरणयोः उपवेशनस्य सौभाग्यं तस्मै प्राप्तम् । सन्ध्यासमये अर्चकेन सर्वाणि पुष्पाणि एकत्रितानि कृत्वा गङ्गानद्यां विसर्जितानि । भ्रमरः डयित्वा कीटकस्य समीपं आगत्य पृष्टवान् —"कः विचारः प्रचलति तव मनसि ?"
कीटकोऽवदत्—जन्मजन्मान्तरेषु कृतेभ्यः पापेभ्यः मम मुक्तिः अभवत् , अधुना प्रारब्धात् मुक्तोऽहम् । एतत् सर्वम् उत्तमसङ्गत्याः एव फलम् ।
अस्य तात्पर्यं किम् ?
जीवनस्य मार्गवक्रतायाम् अस्माकं केन सह मेलनं भविष्यति, तद्वयं ज्ञातुं असमर्थाः । प्रत्येकेन सह अस्माकं रक्तसम्बन्धः न भवितुमर्हति किन्तु नैसर्गिकनियमानुसारं केचन जनाः अस्माकं समीपे आगच्छन्ति । उदा.—नद्याः प्रवाहे द्वौ स्थूलकाष्ठौ सहसा एकत्र आगच्छतः, तयोः सहप्रवासः कियत्कालपर्यन्तं तौ उभौ न जानीतः । अग्रे गत्वा तौ पृथक् भूत्वा प्रवहतः । एतादृशः सम्बन्धःअद्भुतोऽस्ति । अस्य सम्बन्धस्य रक्षणं करणीयम् । तत्र आस्था आवश्यकी किन्तु आसक्तिः मास्तु ।
मूलतः अस्माकं जन्मनः कारणं किम् इति गवेषणम् अवश्यं करणीयम् ।प्रारब्धकर्मानुसारं यदि वयं कस्मैचिदपि देयस्य प्रदानम् अथवा कस्माच्चिदपि ग्रहणं कुर्मः तर्हि समयानुसारेण तस्य मनुष्यस्य मेलनं निश्चयेन भविष्यति एव । तदा देयं अथवा ग्रहणम् इति वयं ज्ञातुं शक्नुमः ?
अस्माभिः केवलं कर्म एव करणीयम् । सत्यं खलु ---
**'' सत्सङ्गाद्भवति हि साधुता खलानां , साधूनां न हि खलसङ्गमात्खलत्वम्।।**
**आमोदं कुसुमभवं मृदेव धत्ते , मृद्गन्धं न हि कुसुमानि धारयन्ति ।।''**

डॉ.वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्

# 31 अगस्तदिनाङ्कस्येतिहासः

१९१९- अमेरिकन-कम्युनिस्ट-दलस्य निर्माणम् अभवत्
१९४७- हङ्गरीदेशे साम्यवादिनः हस्ते सत्ता आगता ।
१९५७- मलयसङ्घः (अधुना मलेशिया) ब्रिटेनदेशात् स्वातन्त्र्यं प्राप्तवान् ।
१९९४- आयरिश-गणतन्त्रसेना दीर्घकालं यावत् संघर्षस्य अनन्तरं युद्धविरामस्य घोषणां कृतवती ।
१९९७- पेरिस्-नगरे ब्रिटेनस्य राजकुमारी डायना तस्याः प्रेमिका डोडी अल-फायद् च कारदुर्घटने मृतौ । तस्य यानं पादमार्गे आहतम् आसीत् । तस्मिन् समये डायना केवलं ३६ वर्षीयः आसीत् ।
२००५- इराकस्य राजधानी बगदाद्-नगरस्य अल-इम्माह-सेतुः भगदड़-प्रहारेन १००० तः अधिकाः जनाः मृताः ।

२०१०- २०१८.

२००३ तमे वर्षात् इराक्-देशे अमेरिकीसैन्यहस्तक्षेपः आधिकारिकतया समाप्तः अस्ति ।
भारतसर्वकारेण पाकिस्तानस्य जलप्रलयपीडितानां कृते साहाय्यराशिः ५० लक्षं डॉलरतः २५ मिलियन डॉलरपर्यन्तं वर्धिता।
उत्तरकोरियादेशस्य गुप्तपरमाणुकार्यक्रमेण सह सम्बद्धानां संस्थानां व्यक्तिनां च सम्पत्तिं स्थगयितुं शस्त्रव्यापारं प्रतिबन्धयितुं च अमेरिकादेशेन नूतनानि प्रतिबन्धानि स्थापितानि
परमाणुसंयंत्रे दुर्घटनायां शीघ्रं क्षतिपूर्तिं सुनिश्चित्य भारतीयसंसदेन परमाणुजनदायित्वविधेयकं पारितम्।